**B.K. BIRLA CENTRE FOR EDUCATION**

SARALA BIRLA GROUP OF SCHOOLS
A CBSE DAY-CUM-BOYS' RESIDENTIAL SCHOOL

**PERIODIC TEST-2 (2025-26)**
**SANSKRIT (119)**

Class : IX — Duration : **1 Hrs**
Date : 07.11.2025 — Max. Marks : **25**
Admission No.: — Roll No.:

---

सामान्यनिर्देशाः

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 4 पृष्ठानि मुद्रितानि सन्ति ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 6 प्रश्नाः सन्ति ।
3. अस्मिन् प्रश्नपत्रे द्वौ भागौ स्तः।
4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

---

पठितावबोधनम् (20 अंकात्मकः)

प्रश्न 01 अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत –

महर्षेः आरुणेः पुत्रः श्वेतकेतुः आसीत्। द्वादशवर्षीयं तं पुत्रं पिता आरुणिः उवाच- हे श्वेतकेतो ! गुरुं प्रति गच्छ अध्ययनार्थं यतः सौम्य। अस्मत्कुलीनः अनधीत्य न भवति इति। सः पुत्रः आचार्यम् उपेत्य यावत् चतुर्विंशतिवर्षः अभवत् तावत् सः सर्वान् वेदान् सार्थान् अधीत्य पितुः सकाशम् आगच्छत्। सः च 'सर्वश्रेष्ठः अहम्' इति मन्यमानः उद्धतस्वभावः अभवत् । एवम्भूतं पुत्रं दृष्ट्वा पिता उवाच - हे श्वेतकेतो ! कः ते उपाध्यायात् अतिशयः प्राप्तः येन त्वं कुलाननुरूपम् उद्धतः असि ? जानासि किं तत् येन श्रुतेन अन्यत् अश्श्रुतम् अपि श्रुतं भवति, अमतं मतं, अविज्ञातं च विज्ञातं भवति इति। एतद् अद्भुतं प्रश्नं श्रुत्वा श्वेतकेतुः पृच्छति कथम् इति! इत्युक्तः पिता अधोलिखितदृष्टान्तेन तत्त्वज्ञानं प्रतिपादयति।

I. एकपदेन उत्तरत- (प्रश्नद्वयम्) (2X1/2=1)

(i) श्वेतकेतुः कस्य पुत्रः आसीत् ?

(ii) श्वेतकेतुः किमर्थं गुरूं प्रति अगच्छत्।

(iii) सर्वान् वेदान् सार्थान् अधीत्य कः पितुः सकाशम् आगच्छत् ?

II. पूर्णवाक्येन उत्तरत- (प्रश्नद्वयम्) (2X1=2)

(i) पुत्रम् उद्धतस्वभावं दृष्ट्वा पिता किम् उवाच ?

(ii) पितुः समीपम् आगत्य सः सर्वश्रेष्ठः अहम् इति मन्यमानः कीदृशोऽभवत् ?

(iii) श्वेतकेतुः कति वर्षाणि यावत् वेदान् अपठत् ?

III. निर्देशानुसारम् उत्तरत (भाषिककार्यम्) - (2X1=2)

(i) अनुच्छेदे 'अनधीत्य' इत्यस्य पदस्य कः विपर्ययः प्रयुक्तः?

(क) अधीत्य (ख) अध्ययनम्

(ग) उवाच (घ) अध्ययनार्थम्

(ii) 'अद्भुतं प्रश्नम्' इत्यनयोः पदयोः विशेष्यपदं किम् ?

(क) प्रश्नम् (ख) अद्भुतम्

(ग) अद्भुतः (घ) प्रश्नः

अथवा

निर्देशानुसारम् उत्तरत (भाषिककार्यम्) -

(i) सः च 'सर्वश्रेष्ठः अहम्' इति मन्यमानः उद्धतस्यभावः अभवत्।' अत्र 'अभवत्' इत्यस्याः क्रियायाः कर्तृपदं किम् ?

(क) अहम् (ख) सः

(ग) मन्यमानः (घ) उद्धतस्वभावः

(ii) 'अध्ययनं कृत्वा' इत्यस्य नुच्छेदे किं विलोमपदम् गद्यांशे प्रयुक्तम् ?

(क) सार्थान् (ख) अनधीत्य

(ग) सर्वान् (घ) वेदान्

प्रश्न 02 अधोलिखितं पद्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत –

पत्र-पुष्पफलच्छाया मूल वल्कलदारुभिः।
गन्ध-निर्यास-भस्मास्थितोक्मैः कामान्वितन्वते ॥1॥

I. एकपदेन उत्तरत- (प्रश्नद्वयम्) (2X1/2=1)

(i) प्रथम-पंक्तौ कति वस्तूनां वर्णनं वर्तते ?

(ii) वृक्षः कान् वितन्वते?

(iii) वृक्षस्य छाल इत्यर्थे किं पदम् आगत्तम् ?

II. पूर्णवाक्येन उत्तरत- (प्रश्नद्वयम्) (2X1=2)

(i) श्लोके 'काष्ठः पदाय किं पदम् आगत्तम्।

(ii) वृक्षाः कैः जनानां कामान् वित्तन्वन्ते?

(iii) वृक्षः सर्वं दत्वा केषां कामान् वितन्वते ?

III. निर्देशानुसारम् उत्तरत (भाषिककार्यम्) - (2X1=2)

(i) 'फलच्छाया' पदे किं अस्ति।

(क) सन्धिः (ख) संयोगः

(ग) प्रत्ययः (घ) समासः

(ii) 'वितन्वते' इत्यस्याः क्रियायाः कर्तृपदं किम्?

(क) अस्थितोक्मेः (ख) वृक्षः

(ग) दारुभिः (घ) छाया

अथवा

निर्देशानुसारम् उत्तरत (भाषिककार्यम्) –

(i) श्लोके 'कुसुम' पदस्य कः पर्यायः प्रयुक्तः?

(क) पुष्प (ख) पत्र

(ग) फल (घ) छाया

(ii) 'आतप' इत्यस्य पदस्य श्लोके कः विपर्ययः आगतः ?

(क) वल्कलदारुभिः (ख) फल

(ग) छाया (घ) पुष्प

प्रश्न 03 अधोलिखितं नाट्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत –

नगरपालः - (तन्तुवायं प्रति) भोः, किमेतत् करोषि ?

तन्तुवायः - महाशय! अहं त्रुटितान् तन्तून् संयोजयामि।

नगरपालः - किं पठितोऽसि ?

तन्तुवायः - आम्, मया गुरुकुले शिक्षा गृहीता।

नगरपालः - किं काव्यरचनां जानासि ?

तन्तुवायः - पश्यतु एव भवान् । तन्तुसंयोजने व्यग्रोऽहं कथं काव्यं कुर्याम् ?

नगरपालः - तर्हि त्वया मया सह राजसभां गन्तव्यम्।

तन्तुवायः - प्रसीदतु भवान् ! तत्र गत्वा किं करिष्यामि। दयस्व, मयि दयस्व। तत्र गमनेन मम कार्यहानिः भविष्यति ।

नगरपालः - नाहं जाने। त्वया गन्तव्यमेव। एष राजादेशः। विसृज कार्यम्। झटिति आगच्छ मया साकम्।

तन्तुवायः - राजादेश इति। गन्तव्यमेव, नास्ति उपायः। चलामि नगरपालक! चलामि।

I. एकपदेन उत्तरत- (प्रश्नद्वयम्) (2X1/2=1)

(i) तन्तुवायः कीदृशान् तन्तून् संयोजयति ?

(ii) कः गुरुकुले शिक्षां गृहीतवान्?

(iii) भोः, किमेतत् करोषि ? इति कः पृष्टवान् ?

II. पूर्णवाक्येन उत्तरत- (प्रश्नद्वयम्) (2X1=2)

(i) नगरपालेन सह तन्तुवायेन कुत्र गन्तव्यम् ?

(ii) तन्तुवायः कथं काव्यं न करोति ?

(iii) राजादेशं ज्ञात्वा तन्तुवायः किम् अवदत्

III. निर्देशानुसारम् उत्तरत (भाषिककार्यम्) - (2X1=2)

(i) 'त्यज' अस्य पदस्य कः पर्यायः अत्र प्रयुक्तः?

(क) आगच्छ (ख) विसृज

(ग) दयस्व (घ) गत्वा

(ii) 'गृहीता' इत्यस्याः क्रियायाः कर्तृपदं किम् ?

(क) शिक्षा (ख) मया

(ग) गुरुकुले (घ) आम्

अथवा

निर्देशानुसारम् उत्तरत

(i) 'लाभः' पदस्य कः विपर्ययः संवादे आगतः ?

(क) आदेशः (ख) उपायः

(ग) हानिः (घ) पठितः

(iii) 'शीघ्रम्' इत्यर्थे नाट्यांशे कः शब्द आगतः?

(क) झटिति (ख) विसृज,

(ग) मयि (घ) कथम्

प्रश्न 04 रेखांकित पदमाधृत्य प्रश्नानिर्माणम् कुरुत - (1X5=5)

(1) अहं त्रुटितान् तन्तून् संयोजयामि |

(2) तन्तुवायेन गुरुकुले शिक्षा गृहीता |

(3) चन्दनस्य मूलं भूजंगै: आश्रितम् |

(4) तरवः स्व विभूतिभिः सर्वेषां कामान् पूरयन्ति |

(5) श्वेतकेतु: न्यग्रोथस्य फलम् आहरति |

व्यावाहारिकं व्याकरणम् (5 अंकात्मकः)

प्रश्न 05 प्रदत्तविकल्पेभ्यः संख्याधारितं उचितम् उत्तरं चित्वा लिखत - (1X2=2)

(1) उद्याने (2) -------- बालकौ क्रीडतः।

(क) द्वे (ख) द्वौ

(ग) द्वाभ्याम् (घ) द्वयोः

(2) नृपस्य दशरथस्य (3) ------- पत्न्यः आसन्।

(क) त्रयः (ख) त्रीणि

(ग) तिस्रः (घ) त्रिभ्यः

प्रश्न 06 अधोलिखितेषु वाक्येषु अङ्कानां स्थाने समयसचूकसंस्कृतसं यापदानि लिखत- (1X3=3)

(1) मम माता प्रातः (5:30) ---------- वादने उत्तिष्ठति ।

(2) (6:15) -------वादने पाकशालायाः कार्यं करोति ।

(3) (6:45) ---------वादने स्वाकार्यं प्रति गन्तुं सज्जा भवति ।

====================== सफलतायै शुभाशयाः =====================